श्रुतयोहयास्ये । गुप्तोऽप्यगे मनुरिलौषधयश्च मात्स्ये क्रौडे हतो दितिजउद्धरताम्भसः क्ष्माम् । कौर्म्मे धृतोऽद्रिरमृतोन्मथने स्वपृष्ठे ग्राहप्रपन्नमिभराजममुञ्चदार्त्तम् । संस्तुन्वतोनिपतितान् श्रमणानृषींश्च शक्रञ्च वृत्रबधतस्तमसि प्रविष्टम् । देवस्त्रियोऽसुरगृहे पिहिता अनाथा जघ्नेऽसुरेन्द्रमभयाय सतां नृसिंहे । देवासुरे युधि च दैत्यपतीन् सुरार्थे हत्वान्तरेषु भुवनान्यदधत् कलाभिः । भूत्वाथ वामन इमामहरद्बलेः क्ष्मां याच्ञाच्छलेन समदाददितेः सुतेभ्यः । निःक्षत्रियामकृत गाञ्च त्रिसप्तकृत्वोरामस्तु हैहयकुलाप्ययबाड़वाग्निः । सोऽब्धिं बबन्ध दशवक्त्रमहन् सलङ्कं सीतापतिर्जयति लोकमलघ्नकीर्त्तिः । भूमेर्भरावतरणाय यदुष्वजन्मा जातः करिष्यति सुरैरपि दुष्कराणि । वादैर्विमोहयति यज्ञकृतोऽतदर्हान् शूद्रान् कलौ क्षितिभुजोन्यहनिष्यदन्ते । एवंविधानि जन्मानि कर्म्माणि च जगत्पतेः । भूरीणि भूरियशसोवर्णितानि महाभुज !" । सुरासुराद्यंशावतारा भारते आदिपर्व्वणि दर्शिताः यथा "इत्युक्त्वा स महीं देवो ब्रह्मा राजन् ! विसृज्य ताम् । आदिदेश तदा सर्व्वान् विबुधान् भूतकृत्स्वयम् । अस्या भूमेर्निरसितुं भारं भागैः पृथक्पृथक् । अस्यामेव प्रसूयध्वं विरोधायेति चाब्रवीत् । तथैव च समानीय गन्धर्व्वाप्सरसां गणान् । उवाच भगवान् सर्व्वानिदं वचनमर्थवत्" । इत्युपक्रम्य "स्वैस्वैरंशैः प्रसूयध्वं यथेष्टं मानुषेषु च । अथ शक्रादयः सर्व्वे श्रुत्वा सुरगुरोर्व्वचः । तथ्यमर्थ्यञ्च पथ्यञ्च तस्य ते जगृहुस्तदा । अथ ते सर्व्वशोंऽशैः स्वैर्गन्तुं भूमिं कृतक्षणाः । नारायणममित्रघ्नं वैकुण्ठमुपचक्रमुः । यः स चक्रगदापाणिः पीतवासाः शितिप्रभः । पद्मनाभः सुरारिघ्नः पृथुचक्षोऽञ्चितेक्षणः । प्रजापतिपतिर्द्देवः सुरनाथो महाबलः । श्रीवत्साङ्को हृषीकेशः सर्व्वदैवतपूजितः । तं भुवः शोधनायेन्द्र उवाच पुरुषोत्तमम् । अंशेनावतरेत्येवं तथेत्याह च तं हरिः" इत्युपक्रम्य च "अथ नारायणेनेत्थं चकार सह संविदम् । अवतर्त्तुं महीं स्वर्गादंशतः सहितः सुरैः । आदिश्य च स्वयं शक्रः सर्व्वानेव दिवौकसः । निर्जगाम पुनस्तस्मात्क्षयान्नारायणस्य च । तेऽमरारिविनाशाय सर्व्वलोकहिताय च । अवतेरुः क्रमेणैव महीं स्वर्गाद्दिवौकसः । ततो ब्रह्मर्षिवंशेषु पार्थिवर्षिकुलेषु च । जज्ञिरे राजशार्दूल ! यथाकामं दिवौकसः" । इति सामान्यत उक्त्वा । "मानुषेषु मनुष्येन्द्र ! संभूता ये दिवौकसः । प्रथमं दानवांश्चैव तांस्ते वक्ष्यामि सर्व्वशः ।

विप्रचित्तिरिति ख्यातो य आसीद्दानवर्षभः । जरासन्ध इति ख्यातः स आसीन्मनुजर्षभः । दितेः पुत्त्रस्तु यो राजन् । हिरण्यकशिपुः स्मृतः । स जज्ञे मानुषे लोके शिशुपालो नरर्षभ ! । संह्लाद इति विख्यातः प्रह्लादस्यानुजस्तु यः । स शल्य इति विख्यातो जज्ञे वाह्लीकपुङ्गवः । अनुह्लादस्तु तेजस्वी योऽभूत् ख्यातो जघन्यजः । धृष्टकेतुरिति ख्यातः स बभूव नरेश्वरः । यस्तु राजञ्छिविर्नाम दैतेयः परिकीर्त्तितः । द्रुम इत्यभिविख्यातः स आसीद्भुवि पार्थिवः । वास्कलो नाम यस्तेषामासीदसुरसत्तमः । भगदत्त इति ख्यातः स जज्ञे पुरुषर्षभ ! । अयःशिरा अश्वशिरा अयःशङ्कुश्च वीर्य्यवान् । तथा गगनमूर्द्धा च वेगवांश्चात्र पञ्चमः । पञ्चैते जज्ञिरे राजन् वीर्य्यवन्तो महासुराः । केकयेषु महात्मानः पार्थिवर्षभसत्तमाः । केतुमानिति विख्यातो यस्ततोऽन्यः प्रतापवान् । अमितौजा इति ख्यातः सोऽग्रकर्म्मा नराधिपः । स्वर्भानुरिति विख्यातः श्रीमान् यस्तु महासुरः । उग्रसेन इति ख्यात उग्रकर्म्मा नराधिपः । यस्त्वश्वइति विख्यातः श्रीमानासीन्महासुरः । अशोको नाम राजाऽभून्महावीर्य्योऽपराजितः । तस्मादवरजो यस्तु राजन्नश्वपतिः स्मृतः । दैतेयः सोऽभवद्राजा हार्द्दिक्यो मनुजर्षभः । वृषपर्व्वेति विख्यातः श्रीमान् यस्तु महासुरः । दीर्घप्रज्ञ इति ख्यातः पृथिव्यां सोऽभवन्नृपः । अजकस्त्ववरो राजन् ! य आसीद्वृषपर्व्वणः । स शाल्व इति विख्यातः पृथिव्यामभवन्नृपः । अश्वग्रीवइति ख्यातः सत्ववान् यो महासुरः । रोचमान इति ख्यातः पृथिव्यां सोऽभवन्नृपः । सूक्ष्मस्तु मतिमान्राजन् ! कीर्त्तिमान् यः प्रकीर्त्तितः । वृहद्रथ इति ख्यातः क्षितावासीत्स पार्थिवः । तुहुण्ड इति विख्यातो य आसीदसुरोत्तमः । सेनाविन्दुरिति ख्यातः स बभूव नराधिपः । इषुपोनाम यस्तेषामसुराणां बलाधिकः । नग्नजिन्नाम राजासीद्भुवि विख्यातविक्रमः । एकचक्रइति ख्यात आसीद्यस्तु महासुरः । प्रतिविन्ध्य इति ख्यातो बभूव प्रथितः क्षितौ । विरूपाक्षस्तु दैतेयश्चित्रयोधी महासुरः । चित्रधर्म्मेति विख्यातः क्षितावासीत्स पार्थिवः । हरस्त्वरिहरो वीर आसीद्यो दानवोत्तमः । सुबाहुरिति विख्यातः श्रीमानासीत्स पार्थिवः । सुहरस्तु महातेजाः शत्रुपक्षक्षयङ्करः । वाह्लीको नाम राजा स बभूव प्रथितः क्षितौ । निचन्द्रश्चन्द्रवक्त्रस्तु य आसीदसुरोत्तमः । मुञ्जकेश इति ख्यातः श्रीमानासीत् स पार्थिवः । निकुम्भस्त्वजितः संख्ये